नं० ११२२-घ

मन्युसूक्तविधानम्

नं० ११२२-घ

पत्रे २ (द्वे)

श्री॥ श्रुतिस्मृतिपु० र्थ यजमानस्य शत्रुपराजयार्थं श्री तापसमन्युसूक्तस्यार्थिय
थाशक्त्या नित्यशः मन्युसूक्तपठनमहं करिष्ये॥ यस्ते मन्यु विति चतुर्दश ऋचस्य
सूक्तस्य॥ तापसमन्युर्ऋषिः॥ मन्युर्देवता॥ त्रिष्टुप्छंदः॥ आद्यैकां त्वाश्वतस्रो
जगत्यः॥ मन्युरिंद्रो मन्युरेवासदेव इति बीजं॥ अभीहि मन्यु विति शक्तिः॥ संसृष्टं ध
नमिति कीलकं॥ यजमानस्य अभीष्टसिध्यर्थे जपे विनियोगः॥ ॐ तापसमन्यवे ऋ
षये नमः शिरसि॥ त्रिष्टुप्जगत्यश्छंदोभ्यो नमः मुखे॥ मन्यवे देवतायै नमः हृदये॥
मन्युरिंद्रो मन्युरेवासदेव इति बीजाय नमः गुह्ये॥ अभीहि मन्यु विति शक्तये नमः॥ पादयोः॥
संसृष्टं धनमिति कीलकाय नमः॥ सर्वांगे॥ ॐ श्रीं संसृष्टं धनमुभयं अंगुष्ठाभ्यां नमः॥
ॐ श्रीं समाकृतमस्मभ्यं दत्तां तर्जनीभ्यां नमः॥ ॐ श्रीं वरुणश्च मन्युः मध्यमाभ्यां नमः॥ ॐ

मन्त्रः
५ ॐ श्रीं भियं दधाना हृदयेषु अनामिकाभ्यां नमः॥ ॐ श्रीं शत्रवः पराजितासः॥ कनिष्ठिकाभ्यां०॥
॥ॐ श्रीं अपनिलयंतां करतलकरपृष्ठाभ्यां०॥ ॐ अथ हृदयादिन्यासः॥ ॐ श्रीं संसृष्टं धनमु
भयं हृदयाय नमः॥ ॐ श्रीं समाकृतमस्मभ्यं दत्तां [redacted]ः॥ शिरसे स्वाहा॥ ॐ श्रीं वरुणश्च
मन्युः शिखायै वषट्॥ ॐ श्रीं भियं दधाना हृदयेषु कवचाय हुं॥ ॐ श्रीं शत्रवः पराजितासः॥ नेत्र
त्रयाय वौषट्॥ ॐ श्रीं अपनिलयंतां॥ अस्त्राय फट्॥ ॐ श्रीं यस्ते मन्यो०॥ शिरसि॥ ॐ श्रीं म
न्युरिन्द्रो मन्यु०॥ ललाटे॥ ॐ श्रीं अभीहि मन्यो०॥ नेत्रयोः॥ ॐ श्रीं त्वं हि मन्यो०॥ कर्णयोः॥
ॐ श्रीं अभागः संन०॥ नासिकायां॥ ॐ श्रीं अयं ते अस्म्युप०॥ मुखे॥ ॐ श्रीं अभिप्रेहि दक्षि०
हृदये॥ ॐ श्रीं त्वया मन्यो सरथ०॥ बाह्वोः॥ ॐ श्रीं अग्निरिव मन्यो०॥ नाभौ॥ ॐ श्रीं सहस्व मन्यो०
गुह्ये॥ ॐ श्रीं एको बहूनाम०॥ जान्वोः॥ ॐ श्रीं विजेषकृदिंद्र इ०॥ जंघयोः॥ ॐ श्रीं आभूत्यास

हजा०॥ पादयोः॥ ॐ श्रीं संसृष्टं धनमुभ०॥ सर्वांगव्यापकं कुर्यात्॥ ध्यानं॥ ज्वलज्ज्वलनार्कप्रतीकाशं ज

टामंडलमंडितं॥ आसन्यः श्रियाविराजंतंदीप्यमानंमुखाबुजं॥ पद्मासनसमा
सीनंध्यायंतंध्यानमुद्रया॥ ध्यायेत्तंतापसंमन्युंमात्माभीष्टधरंपरं॥ लंपृथिव्यात्म
कंतापसमन्यवेगंधंपरिकल्पयामिनमः॥ हंआकाशात्मकंतापसमन्यवेपुष्पंपरिकल्प०॥
यंवायव्वात्मकंतापसमन्यवेधूपंपरिक०॥ रंअग्न्यात्मकंतापसमन्यवेदीपंपरिकल्प०॥
वंअमृतात्मकंतापसम०॥ नैवेद्यंपरिकल्पया०॥ संसर्वात्मकंतापसमन्यवेतांबूलादिस
र्वोपचारान्परिकल्पयामिनमः॥ स्वागतंदेवदेवेशसंनिधौभवमेहरे॥ गृहाणमानसीं
पूजांयथार्थपरिभावितां॥ मालेमालेमहामायेसर्वशक्तिस्वरूपिणी॥ चतुर्वर्गस्त्व
यिन्यस्तस्तस्मान्मेसिद्धिदाभव॥ इतिमानसोपचारैःसंपूज्य॥ पश्चात्पात्रोक्तंच॥

मन्यु० न्यासः

यस्ते मन्यो वि०॥ इति द्वौ वर्गः पृथिव्या॥ त्वं माले सर्वदेवानां सिद्धिदा शुभदा मता॥

2 शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥

8 सिद्धिर्भवतु मे देव त्वत्प्रसादात् सुरेश्वर॥ ॐ वषट् ते विष्णो०॥ यदस्य०॥ विसर्गबिंदु०॥

अनेन न्यासपूर्वकमन्युसूक्तजपाख्येन कर्मणा तेन श्री भगवान् श्रीतापस

मन्युः प्रीयतां॥ नमम॥ इति मन्युसूक्तन्यासः समाप्तः॥ श्रीतापसमन्युर्पण

मस्तु॥ साधलेइ तुष्पाकेन मंडघाम निवासिना॥ नारायणेन लिखितं 2

मन्युसूक्तविधानकं॥ [illegible] लिखितं [illegible] कारी वांचे [illegible] वे॥